[८६९] काण्यादीनां चेति वक्तव्यम् । (म.भा. ३.३४६)

कण – अचीकणत्, अचकाणत्[1] । वण – अवीवणत्, अववाणत् ॥

## लोपः पिबतेरीच्चाभ्यासस्य । (४/२५८७)

पिबतेः अङ्गस्य णौ चङि उपधायाः लोपो भवति, अभ्यासस्य [2]ईकारादेशो भवति । अपीप्यत्, अपीप्यताम्, अपीप्यन् । उपधालोपे कृते ओः पुयण्[3]वचनं (७.४.८०/२५७७) ज्ञापकं णौ स्थानिवद्भावस्य इति स्थानिवद्भावाद् द्विर्वचनम् ॥

## तिष्ठतेरित् । (५/२५८८)

तिष्ठतेरङ्गस्य णौ चङि उपधायाः इकारादेशो भवति । अतिष्ठिपत्, अतिष्ठिपताम्, अतिष्ठिपन् ॥

## जिघ्रतेर्वा । (६/२५८९)

जिघ्रतेः अङ्गस्य णौ चङि उपधाया इकारादेशो वा भवति । अजिघ्रिपत्, अजिघ्रिपताम्, अजिघ्रिपन् । [4]अजिघ्रपत्, अजिघ्रपताम्, अजिघ्रपन् ॥

## उर्ऋत् । (७/२५६७)

णौ चङि उपधायाः ऋवर्णस्य स्थाने वा ऋकारादेशो भवति । [5]इररारामपवादः । इर् – अचिकीर्तत्, अचीकृतत् । अर्[6] – अववर्तत्, अवीवृतत् । आर्[7] – अममार्जत्, अमीमृजत् । वचनसामर्थ्यादन्तरङ्गा अपि इररारो बाध्यन्ते । तपरकरणं दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यात्, अचीकृतत् इति । न चायं [8]भाव्यमानः, [9]किन्तु आदेशान्तरनिवृत्त्यर्थं स्वरूपमेवैतद[10]भ्यनुज्ञायते ॥

## नित्यं छन्दसि । (८/३५६८)

छन्दसि विषये णौ चङि उपधाया ऋवर्णस्य स्थाने ऋकारादेशो भवति नित्यम्[11] । अवीवृधत पुरोडाशेन । अवीवृधताम् । अवीवृधन् ॥

---

1. कण । रण । भण । श्रण । लुप । हेठ । हायि । वाणि (चाणि) । लोटि (लोठि) । लोपि– कणादिः इत्यधिकम् ड, रण – अरराणत् । अरीरणत् । भण् – अबभाणत् । अबीभणत् । श्रण – अशश्राणत् । अशिश्रणत् । लुप – अलुलोपत् । अलूलुपत् । हेठ – अजिहेठत् । अजिहीठत् । हायि – अजहायत् । अजीहयत् । वाणि – अववाणत् । अवीवणत् । लुटि – अलुलोटत् । अलूलुटत् । इत्यधिकम् ह. 2. ईकारः ह. 3. वावचनम् ब. 4. न च भवति इत्यधिकम् ब. इ, अजिघ्रपत् नास्ति क. 5. इररामपवादः क. 6. वृतु वर्तते इत्यधिकम् क. 7. मृज शुद्धौ इत्यधिकम् इ. 8. भाष्यमाणः क. 9. किन्तु नास्ति क. 10. अभ्यनुज्ञायेत ब. 11. पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम् इत्यधिकम् ह.